मायदशनवदनस्कन्धललाटम् दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षण-बाहुम् विस्तीर्णभ्रूस्तनान्तरोरस्कम् ह्रस्वजङ्घामेढ्रग्रीवम् गम्भीरसत्वस्वरनाभिमनुच्चैर्ब्बद्धस्तनमुपचितमहारोमशकर्णम् पश्चान्मस्तिष्कम् स्नातानुलिप्तमूर्द्धानुपूर्व्व्या विशुष्य-माणशरीरम् पश्चाच्च विशुष्यमाणहृदयम् पुरुषम् जानीयाद्दीर्घायुः खल्वयमिति । तमेकान्तेनोपक्रमेत् । एभिर्लक्षणैर्व्विपरीतैरल्पायुर्मिश्रैर्मध्यमायुरिति ॥ भवन्ति चात्र ॥ गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥ गर्भात्प्र-भृत्यरोगो यः शनैः समुपचीयते ॥ शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥ मध्यमस्यायुषो ज्ञानमत ऊर्द्ध्वं निबोध मे । अधस्तादक्षिणयस्य लेखाः स्युर्व्यक्तमायताः ॥ द्वे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ । नासाग्रमूर्द्ध्वञ्च भवेदूर्द्ध्वलेखाश्च पृष्ठतः ॥ यस्य स्युस्तस्य परममायुर्भवति सप्ततिः । जघन्यस्यायुषो ज्ञानमत ऊर्द्ध्वं निबोध मे ॥ ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम् । तथोरस्यवलीढानि नच स्यात् पृष्ठमायतम् ॥ ऊर्द्ध्वञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिणः । हसतो जल्पतो वापि दन्तमांसम् प्रदृश्यते । प्रेक्षते यश्च विभ्रान्तम् स जीवेत् पञ्चविंशतिम् ॥ अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः । तत्राङ्गान्य-न्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति । तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते । प्रदे-शिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरम् पञ्चम-भागहीना । चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपद पादतले । पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः । चतुर्द-शाङ्गुलायतःपादः । चतुर्दशाङ्गुलपरिणाहानि पादगुल्फ जङ्घाजानुमध्यानि । अष्टादशाङ्गुला जङ्घा जानूपरि ष्टाद्द्वात्रिंशदङ्गुलमेवं पञ्चाशत् । जङ्घायामसमावूरू । द्व्यङ्गुलानि वृषणचिबुकदशननासापुटभागकर्णमूलनय-नान्तराणि । चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णल-लाटग्रीवोच्छ्रायदृष्ट्यन्तराणि । द्वादशाङ्गुलानि भगविस्ता-रमेहननाभिहृदयग्रीवास्तनान्तरमुखायाममणिबन्धप्रकोष्ठ-स्थौल्यानि । इन्द्रवस्तिपरिणाहांसपीठकूर्परान्तरायामः षोड़शाङ्गुलः । चतुर्विंशत्यङ्गुलो हस्तः । द्वात्रिंशदङ्गुल-परिमाणौ भुजौ द्वात्रिंशत्परिणाहावूरू । मणिबन्धकूर्परा-न्तरं षोड़शाङ्गुलम् । तलं षट्चतुरङ्गुलायामविस्तारम् । अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चा-ङ्गुले । अर्द्धचतुरङ्गुले प्रदेशिन्यनामिके । सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ । चतुर्विंशतिविस्तारपरिणाहं मुखग्रीवम् । त्रिभागाङ्गुलिविस्तारा नासापुटमर्य्यादा । नयनत्रिभागप-रिणाहा तारका । नवमस्तारकांशो दृष्टिः । केशान्तमस्तकान्त-रमेकादशाङ्गुलम् । मस्तकादवटुकेशान्तो दशाङ्गुलः कर्णा-वट्वन्तरं चतुर्दशाङ्गुलम् । पुरुषोरःप्रमाणविस्तीर्णा स्त्री-श्रोणिः । अष्टादशाङ्गुलविस्तीर्णमुरः । तत्प्रमाणा पुरुषस्य कटी । सविंशमङ्गुलशतं पुरुषायाम इति । भवन्ति चात्र । पञ्चविंशे ततो वर्षे पुमान् नारी तु षोड़शे । समत्वा-गतवीर्य्यौ तौ जानीयात् कुशलो भिषक् । देहः स्वैर-ङ्गुलैरेष यथावदनुकीर्त्तितः । युक्तःप्रमाणेनानेन पुमान् वा यदि वाऽङ्गना । दीर्घमायुरवाप्नोति वित्तञ्च महद-च्छति । मध्यमं मध्यमैरायुर्व्वित्तं हीनैस्तथाऽवरम् । अथ सारान् वक्ष्यामः । स्मृतिभक्तिप्रज्ञाशौर्य्यशौचोपेतं कल्या-णाभिनिवेशं सत्त्वसारं विद्यात् । स्निग्धं संहतश्वेतास्थिदन्त-नखं बहुलकामप्रजं शुक्रेण । अकृशमुत्तमबलं स्निग्धगम्भीर स्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा । महाशिरःस्कन्ध-दृढदन्तहन्वस्थिनखमस्थिभिः, स्निग्धमूत्रस्वेदस्वरं बृहच्छ-रीरमायासासहिष्णुं मेदसा । अच्छिद्रगात्रं गूढास्थिसन्धिं मांसोपचितञ्च मांसेन । स्निग्धताम्रनखनयनतालुजिह्वौष्ठ-पाणिपादतलं रक्तेन । सुप्रसन्नमृदुत्वग्रोमाणं त्वक्सारं विद्यादित्येषां पूर्व्वं पूर्व्वं प्रधानमायुःसौभाग्ययोरपि । भवति चात्र । सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः । परीक्ष्यायुः सुनिपुणो भिषक् सिध्यति कर्म्मसु । व्याधि-विशेषास्तु प्रागभिहिताः सर्व्व एवैते त्रिविधाःसाध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत कि-मसावौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति । तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः । प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च । अन्यलक्षणो यो भविष्यद्व्याधि-ख्यापकः स पूर्व्वरूपसंज्ञः । तत्र सोपद्रवमन्योन्याविरो-धेनोपक्रमेत बलवन्तमुपद्रवं वा । प्राक्केवलं यथास्वं प्रतिकुर्व्वीत । अन्यलक्षणे त्वादिव्याधौ प्रयतेत । भवति चात्र । नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः । अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् । प्रागभिहिता ऋतवः । शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् । कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् । अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया । क्रियाहीना-